**दिनाङ्क :-28.03.2025**

**प्रात: - 06:55**

**अथ वार्ताः**

1. **लोकसभा- अप्रवासनविधेयकम्**

लोकसभया आव्रजनविदेशी-नागरिक- विधेयकं पञ्चविंशत्यधिक-द्विसहस्रतमवर्षीयं पारितम्। विधेयकस्यास्य उद्देश्यम् आव्रजन-विधिनाम् आधुनिकीकरणमिति विद्यते। एतस्मिन् विधेयके पारपत्रस्य यात्राप्रपत्रस्य अथ च पारगमनानुमति-पत्रपञ्जीकरणस्य सम्बन्धे केन्द्रप्रशासनाय शक्तिप्रदानस्य प्रावधानं निहितमस्ति। विधिनां बहुलतां पारस्परिक-व्याप्ततां च अपाकर्तुं विधेयकमिदम् आनीतम् विधयके साधितप्रश्नानाम् प्रत्युत्तरे गृहमन्त्री अमितशाह: अवोचत् यत् एतत् विधेयकं राष्ट्रियसुरक्षां सुदृढीकर्तुं भारतीयविश्वविद्यालयानां वैश्विक- मानकं सुनिश्चेतुम् अनुसन्धान- विकास-विनिर्माणाय च आधारभूतावसंरचनाया: दृटष्ट्या महत्वपूर्णं विद्यते।

**2. राज्यसभा-वित्तविधयकम्**

संसदा पञ्चविंशत्यधिक- षड्विंशत्यधिकद्विसहस्र-तमवर्षयो: केन्द्रीयार्थ- सङ्कल्पना -प्रपत्रम् अनुमोदितम्। राज्सभया ह्य: वित्तविधयकम् अस्य वर्षस्य विनियोग-विधेयक- सङ्ख्या तृतीया च चर्चाया: अनन्तरं लोकसभायै प्रत्यावर्तिता। अनेन साकमेव अस्मै वित्तीय-वर्षाय अर्थसङ्कल्पनाप्रक्रिया सम्पूरिता। लोकसभा मङ्गलवासरे स्वीकृतिं प्रदत्तवती । वित्तविधेयकस्यास्य प्रयोजनम् केन्द्रप्रशासनस्य वित्तीय-प्रस्तावानां कृते स्वीकृति-प्रदानमिति वर्तते। अत्रावधौ वित्तमन्त्री निर्मलासीतारामन् इत्येषा उक्तवती यत् अनेन विधेयकेन व्यापारे सुगमता भविष्यति अथ च भारतीय-करदातृणां सम्मानं भविष्यति।

**3. रक्षापकरणानां क्रयणम्**

रक्षामत्रन्त्रालयेन ह्य: नाग-प्रक्षेपास्त्र-प्रणाल्या: एकस्य योद्धृवाहनरोधि-शस्त्रस्थानकस्य पञ्चसहस्राधिकानाम् अल्पभारयुतानां वाहनानां च क्रयणार्थं पञ्चशताधिक-द्विसहस्र-कोटिरूपकाणाम् अनुबन्धपत्रे एकस्मिन् हस्ताक्षरं कृतम्। अनेन हि क्रयणेन स्वदैशिकोत्पादे राष्ट्रिय-रक्षोपकरण- विनिर्माण-क्षमतासु च वृद्धि: भविष्यति।

**4. जम्मूकश्मीरम्**

जम्मूकश्मीर राज्ये ह्य: कठुआ- जनपदस्य जुथानस्थलस्य सुफैनवनक्षेत्रे जाते सङ्घर्षे त्रय: आतङ्कवादिन: मारिता: तत्रैव सुरक्षाबलानां त्रय: सैनिका: अपि वीरगतिं प्राप्तवन्त:। एक: आरक्ष्युपाधीक्षक: चत्वार: अन्ये च सुरक्षाकर्मिण: व्रणिता: समभवन्। अवधेयं वर्तते यत् सुरक्षाबलै: कृतान्वेषणाभियाने सुफैन-वनक्षेत्रे आतङ्कवादिनां स्थानम् अभिज्ञातम्।

**5. चिली राष्ट्रपति**:

चिलीगणराज्यस्य राष्ट्रपतिः गाब्रियेल-बोरिक-फॉन्टइत्ययम् अप्रैलमासस्य प्रथम-दिनाङ्कात् आरभ्य पञ्चदिवसीययात्रायां भारतं प्रत्यागमिष्यति। तेन सह एकमुच्चस्तरीय-प्रतिनिधिमण्डलमपि आयाति यस्मिन् मन्त्रिणः संसत्सदस्याः वरिष्ठाधिकारिणाः व्यापारसङ्घः वार्तासमूहः च सम्मिलिताः सन्तीति सूच्यते। राष्ट्रपतित्वेन इयं हि राष्ट्रपतेः बोरिक इत्येतस्य प्रथमा भारतयात्रा भवितव्या। स्वप्रवासावधौ राष्ट्रपतिः बोरिक इत्यसौ अप्रैलमासे प्रथमे दिनाङ्के प्रधानमन्त्रिणा नरेन्द्रमोदिना साकं भारत-चिली-देशयोः सम्बन्धानां सर्वेषु पक्षेषु चर्चां विधारस्यति। राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया सहापि असौ वार्तां करिष्यति।

**6. आई. पीएल प्रतियोगिता**

इंडियन प्रीमीयर लीग इत्येतस्याम् ख्यात-क्रिकेट- मालिकायां लखनऊसुपर जायन्ट्स्-दलं सनराइजर्सहैदराबाददलं ह्यः रात्रौ हैदराबादनगरस्य राजीवगांधी-अन्ताराष्ट्रियक्रीडाङ्गणे पञ्चस्तोभैः पराजितवत्। अद्य चेन्नैसुपरकिंग्स-रायल-चैलेन्जर्स-बेंगलुरू-दलयोर्मध्ये द्वन्द्वं चेन्नैनगरस्य एम.ए. चिदम्बरम-क्रीडाङ्गणे भविष्यति।

**।। इति वार्ताः।।**